Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



श्रीनारद ऋषिः । अनुष्टुप् छन्दः । श्रीकृष्णो देवता । ग्लौं बीजम् । नमः शक्तिः । पुत्रार्थे विनियोगः । देवकीसुत गोविन्द हृत् । वासुदेव जगत्पते शिरः । देहि मे तनयं कृष्ण शिखा । त्वामहं शरणं गतः कवचम् । ओं नमः अस्त्रम् ॥ ध्यानम् —

वैकुण्ठादागतं कृष्णं रथस्थं करुणानिधिम् ।
किरीटिसारथिं पुत्रानानयन्तं परात्परम् ॥

आदाय तान् रथस्थांश्च गुरवे वैदिकाय च ।
अर्पयन्तं महाभागं ध्यायेत्पुत्रार्थमच्युतम् ॥

ओं श्रीं ह्रीं क्लीं ग्लौं

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

इति मन्त्रः ॥

अथ सन्तानगोपालमन्त्रान्तरमप्यत्र लिख्यते —

ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीकृष्णो देवता । क्लीं बीजम् । नमः शक्तिः । पुत्रार्थे विनियोगः । क्लां हृत् । क्लीं शिरः । इत्याद्यङ्गानि । ध्यानम् —

शङ्खचक्रगदापद्मं दधानं सूतिकागृहे ।
अङ्के शयानं देवक्याः कृष्णं वन्दे विमुक्तये ॥

ओं नमो भगवते जगत्प्रसूतये नमः ॥ इति मन्त्रः ।

अथ सन्तानगोपालमन्त्रप्रसङ्गात् सनत्कुमारीयोक्तसन्तानगोपालमन्त्रोऽपि लिख्यते —

श्रीनारद ऋषिः। अनुष्टुप् छन्दः। श्रीकृष्णो देवता। क्लीं हृत्। क्लीं शिरः। इत्याद्यङ्गानि। अथवा, देवकीसुत गोविन्द हृत्। वासुदेव जगत्पते शिरः। देहि मे तनयं कृष्ण शिखा। त्वामहं शरणं गतः कवचम्। समस्तैरस्त्रम्।

ध्यानम् - शङ्खचक्रगदापद्मं धारयन्तं जनार्दनम्।
अङ्के शयानं देवक्याः सूतिकामन्दिरे शुभे ॥
एवंरूपं सदा कृष्णं सुतार्थी भावयेत्सुधीः।
देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

इति मन्त्रः। मन्त्रत्रयस्यापि त्रिलक्षजपः।

अथास्यैव सन्तानगोपालमन्त्रस्य पूजादिकं सनत्कुमारीयोक्तप्रकारेण लिख्यते —

वैष्णवपीठे समावाह्य समर्चयेत्। अङ्गैः प्रथमावृतिः। इन्द्रादिभिर्द्वितीया। वज्रादिभिस्तृतीया ।

दशम्यपररात्रौ तु शुक्लपक्षेऽर्चयेद्धरिम् ।
पुत्रार्थं स्वस्तिके न्यस्य शरावं घृतसंयुतम् ॥

कर्पूरवर्तीन्न्यस्यास्मिन् ज्वालयेद्दीपमुत्तमम् ।
पद्ममष्टदळं कृत्वा तत्रस्थं कृष्णमर्चयेत् ॥

सर्वोपचारसंयुक्तं परिवारगणैस्सह ।
त्रिसन्ध्यमर्चयेद्देवमेकादश्यां जनार्दनम् ॥

क्षीरवृक्षकषायेण संपूर्य कलशद्वयम् ।
तत्रावाह्याच्युतं भक्त्या प्रोक्तवत्पूजयेत्पुनः ॥

संस्पृश्य कलशद्वन्द्वमष्टोत्तरसहस्रकम् ।
अष्टोत्तरशतं चापि जपेन्मन्त्रमनन्यधीः ॥

द्वादश्यामथ गोविन्दं संपूज्य विधिपूर्वकम् ।
शाल्यन्नं पायसं स्वादु गोसर्पिर्गुळमिश्रितम् ॥

पक्वाम्रमोचफलवत्सद्यापूपतण्डुलम् ।
स्वादूपदंशं सुस्निग्धं कपिलादधिखण्डवत् ॥

निवेदयेत्स्वर्णपात्रे पात्रभूताय विष्णवे ।
सुशीतलैश्च कर्पूरैः पाटलीसुरभीकृतम् ।
वस्त्रपूतं स्वच्छतरं पानीयं च निवेदयेत् ॥

स्ववित्तशक्त्या गोविन्दबुध्या श्रद्धापवित्रया ।
द्विजेभ्यो भोजनं दद्यात्सर्वकामसमृद्धिमान् ॥

संस्कृते चानले विष्णुमावाह्याघ्यादिभिर्यजेत् ।
हविषाऽष्टोत्तरशतमष्टाविंशतिरेव वा ॥

हुत्वा शिष्टं क्वचिद्द्रव्यं घृतेनाष्टशतं हुनेत् ।
संपातं कलशद्वन्द्वे निक्षिप्यैभौ च दंपती ॥

अभिषिच्य पुनस्ताभ्यां ध्यायन्स्तोत्रमयं हरिम् ।
अष्टोत्तरशतं जप्त्वा हविश्शेषं प्रदापयेत् ॥

कृष्णं ध्यात्वा तु तं पत्नी तमादाय सुखासने ।
आसीना प्राङ्मुखी भूत्वा एनं विष्णुं प्रभक्षयेत् ॥

सुभुक्तान्ब्राह्मणवरान् ताम्बूलैर्मोदकादिभिः ।
सन्तर्प्याथ नमस्कुर्यात् विष्णुं बुध्द्वा च तान्द्विजान् ॥

ततस्ताभ्यामिष्टसिद्धिर्युवयोरस्त्विति द्विजाः ।
ब्रूयुस्तौ च सुसंहृष्टौ फलितं नोऽभिवाञ्छितम् ॥

इति स्मरन्तावनघौ भुञ्जीयातामनन्तरम् ।
एवं यः कुरुते विप्रो वित्तशाठ्यविवर्जितः ॥

विष्णुभक्तो विशिष्टोथ द्वादश्यां सितपक्षके ।
सोचिराल्लभते पुत्रमायुष्मन्तं सुवर्चसम् ॥

सन्ततेश्चाधिकर्तारं विष्णुभक्तं महामतिम् ।
दरिद्रः कर्तुमेवं यः न शक्नोति द्विजोत्तमः ॥

जपेद्वा तर्पयेद्वापि सोपि पुत्रमवाप्नुयात् ।

अथ सन्तानगोपालमन्त्रप्रसङ्गात् अस्यैव मन्त्रसारोक्तं सन्तानकरं यन्त्रं लिख्यते--

कामं मध्ये स्वरयुगलसत्केसरेष्वष्टपत्रे-
ष्वालिख्यैवं जलनिधिमितान्मन्त्रवर्णान् क्रमेण ।
भूयो हल्भिर्बहिरभिवृतं भूपुरस्थं तदेतत्
यन्त्रं सद्यो वितरति नृणां पुत्रपौत्रादिवृद्धिम् ॥

अस्यार्थः— प्रथममष्टपत्रं पद्मं विलिख्य तत्कर्णिकायां क्लीमिति कामबीजं विलिख्य तन्मध्ये साध्यनामादियन्त्रन्यायान् विलिखेत् । पुनरष्टपत्रकेसरेषु अकारादिषोडशस्वरान् द्वौ द्वौ विलिखेत् । पुनर्दलमध्येषु सन्तानगोपालक(मन्त्र)वर्णान् चतुरश्चतुरो विलिखेत् । पुनस्तद्बहिर्वृत्तं विलिख्य, तस्मिन् कादिवर्णैः वेष्टयेत् । पुनस्तद्बहिः चतुरश्रं विलिखेत् । एवं नवनीते वा स्वर्णादिपट्टे वा विलिख्य नारी उपयुञ्जयात् । तस्मात्पुत्रं प्रसूते ॥